# ॥ तैत्तिरीयोपनिषत्॥

## ॥ भृगुवल्ली॥

॥ हरिः ओम्॥

भृगु॒र्वै वा॑रुणिः। वरु॑णं॒ पित॑र॒मुप॑ससार। अधी॑हि भगवो॒ ब्रह्मेति॑। तस्मा॑ ए॒तत् प्रो॑वाच।
अन्नं॑ प्रा॒णं चक्षु॒श्श्रोत्रं॑ मनो॒ वाच॒मिति॑। तꣳहो॑वाच। यतो॒ वा इ॒मानि॒ भूता॑नि॒ जाय॑न्ते।
येन॒ जाता॑नि॒ जीव॑न्ति। यत्प्रय॑न्त्य॒भिसंवि॑शन्ति। तद्विजि॑ज्ञासस्व। तद्ब्रह्मेति॑। स
तपो॑ऽतप्यत। स तप॑स्त॒प्त्वा॥ १॥

अन्नं॒ ब्रह्मेति॒ व्य॑जानात्। अ॒न्नाद्ध्ये॑व खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते। अन्ने॑न जाता॑नि॒ जीव॑न्ति।
अन्नं॒ प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑। तद्वि॒ज्ञाय॑। पुनरे॑व वरु॑णं॒ पित॑र॒मुप॑ससार। अधी॑हि भगवो॒
ब्रह्मेति॑। तꣳहो॑वाच। तप॑सा॒ ब्रह्म॒ विजि॑ज्ञासस्व। तपो॒ ब्रह्मेति॑। स तपो॑ऽतप्यत। स
तप॑स्त॒प्त्वा॥ २॥

प्रा॒णो ब्रह्मेति॒ व्य॑जानात्। प्रा॒णाद्ध्ये॑व खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते। प्रा॒णेन॒ जाता॑नि॒ जीव॑न्ति।
प्रा॒णं प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑। तद्वि॒ज्ञाय॑। पुनरे॑व वरु॑णं॒ पित॑र॒मुप॑ससार। अधी॑हि भगवो॒
ब्रह्मेति॑। तꣳहो॑वाच। तप॑सा॒ ब्रह्म॒ विजि॑ज्ञासस्व। तपो॒ ब्रह्मेति॑। स तपो॑ऽतप्यत। स
तप॑स्त॒प्त्वा॥ ३॥

मनो ब्रह्मेति व्यजानात्। मनसोह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनःप्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ४॥

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ५॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ६॥

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणःप्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ७॥

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिःप्रतिष्ठितम्।

ज्योतिष्यापःप्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितं। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति।

अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ८॥

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशःप्रतिष्ठितः।

आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितं। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति।

अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ९॥

न कञ्चन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्या कया च विदया बह्वन्नं प्राप्नुयात्।

अराध्यस्मा अन्नमित्याचक्षते। एतद्वैमुखतोऽन्नꣳराद्धम्। मुखतोऽस्मा अन्नꣳराध्यते।

एतद्वै मध्यतोऽन्नꣳराद्धम्। मध्यतोऽस्मा अन्नꣳराध्यते। एतद्वा अन्ततोऽन्नꣳराद्धम्।

अन्ततोऽस्मा अन्नꣳराध्यते। य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः।

कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीस्समाज्ञाः।

अथदैविः। तृप्तिरिति वृष्टौ। बलमिति विद्युति। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु।

प्रजातिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान्

भवति। तन्मह इत्युपासीत। महान् भवति। तन्मन इत्युपासीत। मानवान् भवति।

तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः। तद्ब्रह्मेत्युपासीत। ब्रह्मवान् भवति।

तद्ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः। परियेऽप्रिया भ्रातृव्याः।

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवं वित्। अस्माल्लोकात् प्रेत्य।

एतमन्नमयमात्मानमुपसङ्क्रम्य। एतं प्राणमयमात्मानमुपसङ्क्रम्य। एतं
मनोमयमात्मानमुपसङ्क्रम्य। एतं विज्ञानमयमात्मानमुपसङ्क्रम्य।
एतमानन्दमयमात्मानमुपसङ्क्रम्य। इमान् लोकान् कामान्निकामरूप्यनुसञ्चरन्।
एतत्साम गायन्नास्ते। हा(३)वुहा(३)वुहा(३)वु। अहमन्नमहमन्नमहमन्नम्।
अहमन्नादो(२॒)ऽहमन्नादो(२॒)ऽहमन्नादः। अहश्श्लोककृदहश्श्लोककृदहश्श्लोककृत्।
अहमस्मि प्रथमजा ऋता(३)स्य। पूर्वं देवेभ्यो अमृतस्स्य ना(३)भा इ। योमा ददाति
स इदेव मा(३)वाः। अहमन्नमन्नमदन्तमा(३)द्मि। अहं विश्वं भुवनमभ्यभवाम्।
सुवर्न ज्योतीः। य एवं वेद। इत्युपनिषत्॥ १०॥

॥ हरिः ओ(३)म्॥

**॥ इति भृगुवल्ली॥**